# Abhayasam Stava

# अभयसंस्तवः

## Document Information

Text title : Abhayasam Stava

File name : abhayasaMstavaH.itx

Category : vishhnu, vAdirAja, vishnu, stava, dashaka

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Uma Mahesh, Revathy R.

Latest update : May 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2024

*sanskritdocuments.org*

# अभयसंस्तवः

यस्मान्मयि दयालुस्त्वमाभिमुख्यं पुराऽकरोः ।
तस्मात्कदाऽपि कुत्रापि कुतोऽपि न भयं मम ॥ १॥

त्वद्दयार्द्रदृशा दृष्टा ब्रह्माद्या लोकपालताम् ।
अगमन्निगमोद्धर्तः क्व दैन्यं क्व च ते दया ॥ २॥

यं पासि त्वं किम्पुरुषे सोऽत्र साक्षी कपीश्वरः ।
तथा विभीषणः साक्षी दिवि साक्षी ध्रुवो ध्रुवः ॥ ३॥

भुवोऽधस्ताद्बलिः साक्षी यद्द्वार्यद्यापि वर्तसे ।
धरा च साक्षिणी या प्राग्वराहवपुषोद्धृता ॥ ४॥

वेदश्च साक्षी यद्ग्रन्थं बिभर्षि करपङ्कजे ।
गिरिश्च मन्दरः साक्षी देवाश्चाध्वनि चूर्णिताः ॥ ५॥

भवः साक्षी भस्मदैत्यभस्मीकरणविक्रम ।
दक्षस्साक्षी रक्षितो यस्त्वया देवर्षिसंसदि ॥ ६॥

द्रौपदी च तथा साक्षिण्यक्षयाम्बरदायक ।
सौभद्रस्य सुतः साक्षी यं द्रौण्यस्त्रादजीवयः ॥ ७॥

सुधादृष्टिमृताशेषस्वसैन्योज्जीवनैकद ।
कपिसेना साक्षिणी सा प्रह्लादाजामिळावपि ॥ ८॥

भूयो भूयः साहचर्याद्व्याप्तिर्निर्णीयते किल ।
अतस्त्वं नियमेनासि भक्तानां भयभञ्जनः ॥ ९॥

अकुतश्चिद्भयं प्राह यतस्ते पादसेवनम् ।
स्मृतिर्भागवताख्या तद्व्याप्तिराप्तोक्तितोऽप्यभूत् ॥ १०॥

दशदिक्षु गताऽसद्भ्यः सतां भयजिहीर्षया ।
दशश्लोक्या वादिराजश्चकाराभयसंस्तवम् ॥ ११॥

इति श्रीमद्वादिराजपूज्यचरणविरचितः अभयसंस्तवः सम्पूर्णः ।

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Uma Mahesh, Revathy R.

*Abhayasam Stava*

pdf was typeset on May 7, 2024

Please send corrections to *sanskrit@cheerful.com*